श्रीआत्मानन्द-ग्रन्थरत्नमाला-चतुर्विंशं रत्नम् (२४)

महामहोपाध्यायश्रीमेघविजयविरचितो

# मेघदूतसमस्यालेखः ।

स च

योधपुरवास्तव्येन दाधीच (दाधिमथ)-कासल्यो-
पाख्य-माधवकवीन्द्रनन्दनेन आशुकवि-
नित्यानन्दशास्त्रिणा संशोधितः ।

प्रवर्त्तकश्रीमत्कान्तिविजयशिष्यश्रीमच्चतुरविजयोपदिष्ट-
पत्तनवास्तव्यश्रीमालिज्ञातीयश्रेष्ठि-वस्ताचन्दात्मज-
भीखाचन्द-द्रव्यसाहाय्येन-

प्रकाशयित्री

भावनगरस्था श्रीजैनआत्मानन्दसभा.

वीरसं. २४४० आत्मसं १८ विक्रमसं १९७०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

महामहोपाध्यायश्रीमेघविजयविरचितो

# मेघदूतसमस्यालेखः ।

स च

योधपुरवास्तव्येन दाधीच (दाधिमथ) कासल्यो-
पाख्य-माधवकवीन्द्रनन्दनेन आशुकवि-
नित्यानन्दशास्त्रिणा संशोधितः ।

प्रवर्त्तकश्रीमत्कान्तिविजयशिष्यश्रीमच्चतुरविजयोपादिष्ट-
पत्तनवास्तव्यश्रीमालिज्ञातीयश्रेष्ठि-वस्ताचन्दात्मज-
भीखाचन्द-द्रव्यसाहाय्येन-

प्रकाशयित्री

भावनगरस्था श्रीजैनआत्मानन्दसभा ।

श्री महावीर जैन आराधना केन्द्र, कोबा

Published by Vallabhadas Tribhuwandas Gandhi,
Secretary, Jaina Atmanand Sabha, Bhavanagar.

Printed at the "Lakshmi Vilas Press Co. Ltd. By C. L. Patel,
in Bhau Kale's lane Baroda, for the Publisher 25-4-14.

वीरसं. २४४० आत्मसं १८ विक्रमसं १९७०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ अर्हम् ॥

# ॥ प्रस्तावना ॥

अस्य सहृदयहृदयानन्दिमेघदूतसमस्यालेखस्य खण्डकाव्यस्य कवितारः श्रीमदकब्बरभूभृद्विश्राणितजगद्गुरुविरुदधारकबृहत्तपागच्छनायकश्रीमद्हीरविजयसूरीश्वरशिष्यसंततिसंजातश्रीकृपाविजयान्तेवासिनो महोपध्यायाः श्रीमन्तो मेघविजया आसन्। यद्यप्यस्मिँल्लेखे क्वापि स्वगुरोर्नाम स्वकीयसत्तासमयश्च साक्षान्नोपनिबद्धं तथाप्यस्यावसानगतस्य—

**" माघकाव्यं देवगुरोर्मेघदूतं प्रभप्रभोः ।**
**समस्यार्थं समस्यार्थं निर्ममे मेघपण्डितः" ॥१३१॥**

इत्येतत्पद्यस्यान्तर्वर्तिना आद्यपादेन श्रीविजयदेवगुरुवर्णनरूपमाघकाव्यसमस्यापूर्तिकाव्यस्य द्वितीयपादेन श्रीविजयप्रभसूरिविज्ञप्तिरूपमेघदूतसमस्यालेखस्य च एककर्तृत्वे सिद्धे माघकाव्यसमस्यापूर्तिकाव्यप्रशस्तिगताभ्याम्—

**" तत्सेवासक्तचेता अनवरततया प्राप्तलक्ष्मीर्विशिष्य**
**शिष्यः श्रीमत्कृपादेर्विजयपदभृतः सत्कवेर्वाचकश्रीः ।**
**मेघः पद्मप्रसादाद्विशदमतिजुषां श्राव्यकाव्यं चकार**
**देवानन्दं सदैन्द्रोज्ज्वलविपुलधिया शोध्यतां शोध्यमत्र"॥**
**" मुनिनयनाश्वेन्दुमिते १७२७ वर्षे हर्षेण सादडीनगरे ।**
**ग्रन्थः पूर्णः समजनि विजयदशम्यामिति श्रेयः ॥ "**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्येताभ्यां पद्याभ्यां श्रीमत्कृपाविजयमुनिपुङ्गवानामन्तेवासित्वं वैक्रमीयेऽष्टादशे शते स्वकीयविद्यमानत्वं च प्रकटितमेव ।

एभिः कविचक्रचूडामणिभिरेतस्मादतिरिक्ता व्याकरणकाव्यज्योतिर्निमित्ताध्यात्मधर्मशास्त्रादिविषयपोषका दृष्टिसुधासेककल्पा विरचिता अनेके ग्रन्था दृष्टिपथपान्थतां समायान्ति ।

अस्मिँल्लेखे कस्मिँश्चित्पुरे चातुर्मासिकीस्थितिं कुर्वाद्भिः कविभिर्मेघदूतद्वारा श्रीदेवपत्तनस्थतपगणपतिश्रीमद्विजयप्रभसूरीश्वराणां कुशलवार्त्तादिसंसूचकं वाचिकं प्रेषयद्भिर्देवगिर्यादीनां वर्णनं कृतमास्ति, तत्तु बुद्धिमद्भिः स्वयमेवावभोत्स्यते इति नात्रातिकथनावश्यकतेति ।

अस्यैकमेव पुस्तकं पत्तनस्थसागरगच्छीयपुस्तककोषात्समासादितं तस्यैवाधारेण योधपुरनिवासिभिराशुकविनित्यान्दशास्त्रिभिः संशोधितं टिप्पणीकृतं च । प्रुफपत्राणि तु श्रीमद्विजयानन्दसूरीश्वरशिष्यप्रवर्तकश्रीमत्कान्तिविजयचरणकमलचञ्चरीकायमाणैः श्रीमच्चतुरविजयाभिधानैर्विलोकितानि । अत एतयोरुपकृतिपरम्परां स्मृति गोचरतां नयामि ।

महता प्रयासेन शोधितेऽप्यत्र निबन्धे यत्र किमप्यशुद्धं कृतं जातं वा भवेत्तत्र संशोधनीयं धीधनैरिति प्रार्थयते—

**भावनगरस्था आत्मानन्दसभा ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ अर्हम् ॥

॥ श्रीमद्विजयकमलसूरीश्वरपादपद्मेभ्यो नमः ॥

श्रीमेघविजयोपाध्यायविरचितो

# मेघदूतसमस्यालेखः ।

( मन्दाक्रान्तावृत्तम् )

स्वस्ति श्रीमद्भुवनदिनकृद्वीरतीर्थाभिनेतुः
प्राप्यादेशं तपगणपतेर्मेघनामा विनेयः ।
ज्येष्ठस्थित्यां पुरमनुसरन् नव्यरङ्गं ससर्ज
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

तस्यां पुर्यां मुनिगणगुरोर्विप्रयोगी स योगी
नीत्वा मासान् कतिचिदचिराद्वाचिकं नेतुकामः ।
भाद्रे पञ्चम्युदयदिवसे मेघमाश्लिष्टसौधं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

मत्वा तस्याऽभ्युदयनदशां वायुनोन्नीयमानां
चेतो वाचं झटिति गमनापेक्षमूचेऽस्य साधोः ।
प्रत्यासन्नेऽप्ययि ! तव गुरौ कार्यकार्यस्ति योगः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

---

१ भाद्रपदसितपञ्चम्यां पत्रादिद्वारा संदेशः प्रेर्यत इति जैना प्रथा॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तद्विज्ञप्त्यै त्वरय रयतः स्वं पुनानाऽऽशुनाना-
भावैरेवं किमिव मनसोदीर्णवाक्यः स बालः ।
हस्ताम्भोजद्वयरचनया निर्मितार्चाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥
कायं प्रायः पवनसलिलज्योतिषां संनिकायः
कार्थश्चायं प्रवणकरणैर्यो विधेयः समर्थः ।
हर्षोत्कर्षादिति स सहसा चिन्तयन्नूचिवांस्तं
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५ ॥
जज्ञे भूमावतिविषमताऽन्योन्यसाम्राज्यदौस्थ्या-
त्कश्चिन्मां नो नयति यतिनामीशितुर्[1]वार्त्तवार्त्ताम् ।
तत्त्वां याचे स्ववशमवशात्सृष्टविश्वोपकारं
याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥
भ्रातस्त्रातस्त्वमसि भुवने जीवनं जीवनन्दी
तापव्यापापहृतिनिपुणस्तत्पयोवाह ! रम्या ।
गम्या चारै रुचिरनगरी देवकात्पत्तनाख्या
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥
नित्यं चेतः स्फुरति चरणाम्भोजयोः सूरिराजैः[2]
कायः सर्वैः समयविषयैः संनिबद्धान्तरायः ।
नो[3] चेदीदृग्गुरुसुरतरुं प्राप्य कः स्याद्दवीयान्[4]
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥

---

१ कुशलवार्ताम् । २ सूरिराजस्येत्यर्थः । ३ नः चेत् अर्थात् कायस्य विषयकृतविघ्नशून्यत्वे । ४ अतिदूरवर्ती ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रेयस्यर्थे प्रभवति बलादन्तरायस्तदस्य
प्रध्वंसायाभ्युचितमचिरादाचिरेयं भजस्व ।
लाभोऽप्यत्र त्रिदशललनानेत्रसंवीक्षणैस्त्वां
सेविष्यन्ते नयनसुभगं खे[1]भवन्तं ब[2]लाकाः ॥ ९ ॥

अथ प्राप्तानुषङ्गं श्रीशान्तिजिनवर्णनम्—

देवः शान्तिर्भवति भविनां दुर्भवाम्भोधिसेतु-
र्हेतुर्भूयोऽनुभवभव[4] भोगसंयोगलक्ष्म्या ।
दुष्टैः कष्टैर्व्ययभयमयैः संनियोगेऽङ्गभाजः
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ॥ १० ॥

अस्याह्वानस्मरणकरणोद्भूतभूयःप्रभावाः
श्रद्धाभाजो विततमुरजस्येव गर्जं निशम्य ।
नृत्यारम्भे जिनपतिपुरः सज्जिगीषोः स्वरुच्या
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥

अर्हत्यस्मिन् सृजति भुवनोद्भासनं दीपरूपे
चेतोवृत्तीर्बहलतमसश्छेदनाय प्रपद्य ।
स्यात्तत्राभिप्रणतमनुजस्वर्गिवर्गस्य चित्रं
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ १२ ॥

हर्षाद्वर्षाविहितहितकृत्स्नात्रकृत्यः प्रसूनै-
र्वातानीतैः प्रणयतु विभोश्चारुचर्यां सपर्याम्

---

१ पलं कालभागविशेष उपलक्षणात्कालः । २ खभ आकाशगज ऐ-रावतस्तद्वान् । २ वराणि अङ्गानि भूषणानि यासां ताः । ३ अत्रैको गुरुर्वर्णस्त्रुटितः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुर्वन्नुर्वीं स्वतनुमतनुं तीर्थभावाश्रितानां
क्षीणः क्षीणः परिलघुपयःश्रोतसां चोपभुज्य ॥ १३ ॥
देवस्यास्य प्रसवसमये दिक्कुमारीभिरुच्चै-
र्गन्धाम्भोदः प्रसृमरसुमाऽऽमोदशाली विचक्रे ।
पित्रा तत्रार्जितसुकृततो विश्वशीर्षे त्वमेषि
दिग्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥१४॥
उद्यद्बालारुणघृणिगणोन्मिश्रशुद्धाश्मगर्भ-
च्छत्रेणैतां तनुमनुदिनं भासितामस्य पश्य ।
मन्दारद्रुप्रभवनिचयैः पथ्यनेपथ्यभाजो
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥
श्यामीभावं शमयितुमना वामभागे वितत्या
प्रादक्षिण्यं नय गुरुमुरुश्रेयसा देवमेनम् ।
नृत्यासक्तामरवरवधूवेषवस्त्रायमाणः
किञ्चित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥
शङ्के राकातुहिनकिरणो वैश्वसेनिस्वरूपा-
च्चक्रे पूजास्पदमिह मृगं स्वस्य संवाहकं खे ।
न क्षुद्रेऽपि प्रथमसुकृतोद्भावजन्मोपकारः
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १७
रङ्कश्चन्द्रं जिनमुखविभाक्रोषसञ्जातदोषं
पादाम्भोजे नखरमिषतोऽभ्यानयत्सप्रसादम् ।
स्वीयोत्सङ्गे तदिव हरिणो धीयते शीतभासा
सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ॥ १८

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गायन्तीनां जिनवरपुरश्चारुलीलावतीनां
रूपोत्प्रेक्षाविवशमनसि त्वय्यथाग्रं प्रपन्ने ।
प्राप्तः स्वाहाशनजनमनःकाम्यतां मण्डपोऽपि
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥१९॥
नानारत्नाभरणकिरणैर्भूषितां द्यूषिता[1]र्च्यां
जैनीमर्चां[2] तव विनमतः काऽपि कान्तिर्भवित्री ।
यामालोक्याभिनवनवनै[3]र्वर्णयिष्यन्ति सिद्धाः
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ २० ॥
तस्याः स्नात्रे दनुजमनुजैर्गात्रपावित्र्यहेतौ
सृष्टे दिष्ट्या प्लुतमविरलं क्षीरमादेयमेव ।
तन्माहात्म्यात्पवनयवन[4]स्तेऽभिभूत्यै प्रभुर्न
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥२१॥
लोकाः कुष्ठाद्गलितवपुषो निर्विरोकाः सशोकाः
अर्हत्स्नात्रामृतभरसरःस्नातमात्राः क्षणेन ।
भूत्वा भास्वल्ललिततनवो दिव्यभोगैर्भजन्ति
सोत्कण्ठानि प्रियसहचरीसंभ्रमालिङ्गितानि ॥ २२ ॥

॥ इति जिनवर्णनम् ॥

नास्मिन्मार्गेऽस्म्यहमयि ! गतस्तच्च यात्रानुवेश्म
गत्वा श्राद्धाः सदयहृदयाः संपदां संप्रदायाः ।

१ दिवि स्वर्गे उषिताः द्यूषिता देवास्तैरर्च्यां पूज्याम् । २ प्रतिमाम् । ३ नवीनस्तवैः । अर्चायाः ( प्रतिमायाः ) ४ पवनस्य यवनो वेगः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रष्टव्यास्ते गुरुमुखघनान्निर्गलद्वाग्जलानां
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥२३॥
रत्नश्रेणीरचितनिचितस्वर्णसङ्कीर्णसौधे-
ष्वस्यां जालान्तरपरिलसल्लोलनेत्राकलापैः ।
शुक्लापाङ्गैर्मधुरवचनैर्वन्दनां वक्तुकामैः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥२४॥
वृष्टे ह्यत्र त्वयि प्रतिगृहं केतकोत्सेधहेतौ
धारायन्त्रावलय उदितोत्तुङ्गरङ्गत्तरङ्गाः ।
अन्तर्मज्जत्सरसिजदृशां वक्त्रपद्मैः सपद्माः
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः[1] ॥२५॥
प्रस्थानार्थं तव सवयसं प्रार्थयस्वार्थवन्तं
कासारं तं जलजरजसा पीतवासो वसानम् ।
सिन्ध्वा वध्वा अधरमधुरं यः पिबत्युन्नमय्य
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्या[2]श्चलोर्मि ॥ २६ ॥
स्थित्वा तीरे ध्रुवमुपसरश्चञ्चलाचञ्चलाक्षीः[3]
धाराहस्तैः कुसुममधुरां दर्शयेस्तां वनालीम् ।
या प्रायोग्यैः सुरतललितप्रक्रियाणां प्रियाणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २७ ॥

---

१ दशार्णा इवेति लुप्तोपमाऽलङ्कारः, दश ऋणानि जलदुर्गाण्यस्यां दशार्णा नदी । २ वेत्रवत्या वेत्रवृक्षशालिन्याः सिन्ध्वा इति व्याख्येयम् । ३ ( उपसरः तडागसमीपे ) चञ्चलानि विद्युत् तद्वच्चञ्चलानि अक्षीणि यासां ताः स्त्रीः इति अण्यन्तकर्तुः कर्म ज्ञेयम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संस्थानेन प्रहितमतुलं वीक्ष्य पक्वान्नवृन्द-
मुद्यानेऽपि स्वतरुषु चलच्छाखिकानां मिषेण ।
पुष्पश्रेणीं प्रहितुमनसि ( ? ) प्रोन्नतानां समेधि
च्छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम्॥२८॥

अस्यां पुर्यां नरपतिनमन्मौलिमालार्चितांह्रिः
साहेः पुत्रः सुनयनयनः पाति लोकान् पितेव ।
गीर्वाणस्त्रीसदृशसुदृशां तस्य सौधोर्द्ध्वगामी
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥ २९ ॥

नार्यः पुर्यां प्रतिगृहमिह श्रेणिमापूर्य तूर्यै-
रुद्दिश्येशं प्रणयरचितं गानमुत्तानयन्ति ।
श्रुत्वा तास्त्वां रसितमसितैर्मोहयिष्यन्त्यपाङ्गैः
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ ३० ॥

रोदस्योस्त्वां परिचितमिति स्वीयचित्तेऽवधृत्य
सीमन्यस्याः कृषिकरजना बीजराजीं वितेनुः ।
संप्रत्येषाऽङ्कुरमुकुलनैः प्राञ्जलीभूय नम्रा
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥३१॥

धन्योऽसि त्वं जलदपटले ! दक्षिणस्यां प्रविश्य
दृष्टं येन प्रवरनगरं सारमेतज्जगत्याः ।
भुक्ते भाग्ये भुवि नु मरुतां देवशैलाद्द्विधाऽपि
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥ ३२ ॥

अत्राश्लेष्टुं कमलवदना वीचिहस्तैः सरस्यः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रोक्ताः कान्ता इव सुवयसां त्वां विजानन्ति शब्दैः ।
मुक्त्वा नस्त्वं विरहविधुराः कुत्र गन्तासि भोग्योऽ-
सि प्रावातः[1] प्रियतम इव प्रार्थनाचाटुकारः ॥ ३३ ॥
अस्यां मुक्तामरकतपविश्रीप्रसूनेन्दुरत्न-
पूगान् दृष्ट्वा तरणिशशिनोः श्रान्तकान्तिस्वरूपान् ।
पुण्यश्रेणीविपणिगणितान् विद्रुमच्छेदराशीन्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥ ३४ ॥

॥ इत्यवरङ्गावादवर्णनम् ॥

अस्याः प्राच्यां सुभगभगिनी देवगिर्याह्वयास्ति
पूर्वं प्रत्याश्रयमिह चिरं तस्थिवान् रामचन्द्रः ।
सख्यौ स्नेहादिह जनकजा लक्ष्मणः केलिमाधा-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥३५॥
तस्यां छत्रायितसुरगिरौ वप्रमौलिं दधत्यां
राज्ञस्तूर्यैर्द्विगुणितरवैर्नर्त्तयेथा मयूरान् ।
गेहेषूच्चैः प्रसवनिचयाकीर्णमध्येषु नूनं
नीत्वा खेदं ललितवनितापादरागाङ्कितेषु ॥ ३६ ॥
एतत्पुर्याः पुरपरिसरादाम्रकम्रातपत्रा-
त्त्रासीनो नगरसुषमां मार्गयाद्रौ विनिद्राम् ।

---

१ असि, प्राऽव, अतः इतिच्छेदः । त्वं भोग्योऽसि, अतः प्राव रक्षेत्यर्थः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कासाराणां विकचकमलामोदिभिः सेव्यमान-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३७ ॥
स्नात्रे श्राद्धैस्त्रिभुवनगुरोस्तत्र निर्मीयमाणे
नानारत्नांशुकरचनया भूषिते भूमिभागे ।
सद्यो वाद्यानुचरचरितैः शब्दयन्नब्दं[1] रत्न-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥३८॥
पीनोत्तुङ्गस्तनभरनता गात्रसौन्दर्यभाजो
वामाः पुष्पैर्वृषभभगवत्पूजनं कर्त्तुकामाः ।
मूर्त्तेः स्नानादिव समुचितान् प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥३९॥
आश्लेषार्थं सुहृदिव गिरिः शाखिबाहून् वितत्य
तत्रार्चास्तास्तव विरचयिष्यत्यनर्घ्यप्रसूनैः ।
गृह्णन् जन्माप्यविरलफलं मानयिष्यत्यमर्त्यैः
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान् याः[2] ॥ ४० ॥
तारुण्येन[3] स्मरपरवशां शिक्षितानां प्रवृत्तिं
रात्रौ स्त्रीणामुपपतिगतौ श्रोणिभारालसानाम् ।
देह्यालम्बं विमलतडितं दर्शयंस्तत्र मार्गं
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥४१॥

---

१ अपो ददातीति अब्दो मेघः । २ याः अर्चाः पूजाः ( कर्म ) भवान् अमर्त्यैः देवैः ( करणैः ) मानयिष्यति । ३ पाठान्तरे "धर्मस्थानाद्गुरुगुणकथावश्यकान्तोत्थितानाम्" ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्येतस्मान्नगरयुगलाद्वीक्ष्य केलिस्थलं त्व-
मीलोराद्रौ सपदि विनमन्पार्श्वमीशं त्रिलोक्याः ।
भ्रातः ! प्रातर्व्रज जनपदस्त्रीजनैः पीयमानो
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ।। ४२ ।।

त्वामुद्यान्तं नभसि सहसाऽवेक्ष्य कान्ता वियुक्ता-
स्त्रासव्यासं दधति सरसां पार्श्वमस्माज्जहीहि ।
रात्रौ म्लाना इह कमलिनीर्मोटि[1]तुं भानुमाली
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ।। ४३ ।।

मार्गे यान्तं बहुलसलिलैर्दाववह्निप्रशान्ते-
र्गोत्रैः कृप्तोपकृतिसुकृतं रक्षितुं त्वां नियुक्ताः ।
नद्यस्तासां प्रचितवयसामर्हसि त्वं न धैर्या-
न्मोघीकर्त्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि ।। ४४ ।।

काचित् कान्ता सरिदिह तव प्रेक्ष्य सौभाग्यभङ्गी-
मङ्गीकुर्याच्चपलसलिलावर्त्तनाभिप्रकाशम् ।
चक्रोरोजावरुणकिरणाच्छादनात्पीडयास्याः
ज्ञातास्वादो विपुलजघनां को विहातुं समर्थः ।। ४५ ।।

वर्त्मन्यस्मिन् विविधगिरयस्त्वत्परिस्यन्दमन्दी-
भूतोत्तापाः क्षितिरुहदलैस्तेऽपनेष्यन्ति खेदम् ।
पुष्पामोदी करिकुलशतैः पीयमानस्तवातः
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ।।४६।।

---

१ विकासयितुम् ( भानुमाली सूर्यः ) ।।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गत्यौत्सुक्येऽप्यणकिटणकीदुर्गयोः स्थेयमेव
पार्श्वः स्वामी स इह विहृतः पूर्वमुर्वीशसेव्यः ।
जाग्रद्रूपे विपदि शरणं स्वर्गिलोकेऽभिवन्द्य-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥ ४७ ॥

उत्पत्त्यास्मात्प्रणम विपुले तुङ्गिआ[1]शैलशृङ्गे
रामं कामं श्रमणवृषभं बोधितारं पशूनाम् ।
तत्संबुद्धान्वयजशिखिनो मूर्त्तिमस्याभिषिच्य
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्त्तयेथाः ॥ ४८ ॥

वर्षाभिस्ते शिखरिशिखराद्गैरिकाणां प्रवाहैः
सिन्धुः पूर्णा ह्यवनिवनिताचङ्ग[2]नीरङ्गिकेव ।
जेष्यत्येष्यन्नवजलभरासङ्गमोत्फेनराशिः
श्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्त्तिम् ॥ ४९ ॥

उत्तीर्याथ त्वयि शिखरिणां धोरणेर्निम्नभावा-
ल्लीने भूमाविव जलललच्छैवलिन्योः प्रसङ्गे ।
द्रक्ष्यन्त्योघं त्रिदशवनिताः स्निग्धतापात्रनेत्रै-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ५० ॥

एष्यत्यग्रेऽभ्युदयकमलामन्दिरं बन्दिरं श्री-
सूर्याख्यं ते नयनविषयं स्वर्णपूर्णं क्रमेण ।

---

१ 'तुङ्गिआ' इति नाम । अवनिरेव वनिता स्त्रीः तस्याः चङ्गा मनोहरा नीरङ्गिका मुखावगुण्ठनमिव ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संगन्तास्मिन् सुहृदपि घनो मालवान्ते स्वगात्रं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥ ५१ ॥

सभ्येभ्यानामहमहमिकाबद्धसौधाग्ररत्नै-
रातिथ्यं ते बहु विरचयन्मानयेस्तत् पुरापि ।
हैमैः श्राद्धव्रज इह गुरोरागमे मार्गणानां
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ ५२ ॥

श्रीमान् पार्श्वप्रभुरिह जयत्यग्रजाग्रत्प्रभाव-
स्तस्य स्नात्रामृतसमुदयैः पूयते तापिकाऽपि ।
संसृज्यैनां रुचिररमणीस्नानकर्पूरपूर्णा-
मन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥५३॥

तस्माद्भृच्छेरनु भृगुपुरं सिन्धुबन्धुप्रसक्ता-
मद्रेर्बाहामिव शशिसुतां पूर्वगङ्गेति नाम ।
रक्षन्ती या प्रस्मरजटाघट्टदम्भाद्वटस्य
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ५४ ॥

रेवातीरे भृगुपुरवरस्फाटिकावासराजी
तस्या बिम्बं विमलसलिले स्वर्धुनीवाऽपराऽस्ति ।
तत्र च्छाया परतटमथालम्बते ते तदैषा
स्यादस्थानोपगतयमुनासङ्गमेनाभिरामा ॥ ५५ ॥

अग्रे दृष्ट्वा जलमयमहीवन्महीनामासिन्धुं
सिन्धोरूर्मीपृथुतरभुजैर्गाढमालिङ्ग्यमानाम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लब्धा स्तब्धाब्धिकफनिचयाभ्यासेवर्त्ती हिमाद्रौ
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५६ ॥
स्थाने स्थाने सरणिधरणीभृद्भिराग्रह्यमाणा
तन्वी खेदादुपपति सरेत्तर्हि नीरैस्तथाऽस्याः ।
कुर्याः पौष्ट्यं स्खलति न यथा भूषिता चक्ररत्नै-
रापन्नार्त्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥ ५७ ॥
उत्तीर्णस्तां हरिगृहपुरं प्राप्य तत्कौतुकार्थी
व्यालम्बेथा मणिमयशिलाप्रौढसभ्यालयालीम् ।
यत्ते द्विष्टाः पवनयवनास्तत्र भङ्गं लभन्ते
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥५८॥
तत्र व्यक्तं दृषदि चरणन्यासमासज्य पूज्यं
राज्याधीशैर्विजयपदतः सेनसूरेर्भजस्व ।
तीर्णान्यन्यान्यपि सुमनसो यानि दृष्ट्वैव भव्याः
सङ्कल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५९ ॥
स्त्रीवक्त्राब्जे भ्रमरललितं सुभ्रुवोः प्रेक्ष्य तत्र
कान्तारेऽब्धेस्तटमनुसरेस्साभ्रमत्याः प्रसङ्गि ।
वीचीनृत्यैस्तव घनरवैर्वेणुवादैर्जनस्य
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥ ६० ॥

---

१ लब्धा प्राप्स्यतीत्यर्थः । २ अब्धिकफः फेनः । अभ्यासः सामीप्यम्, दन्त्योपान्त्योऽप्ययं शब्दः । ३ पत्युः स्वमनःकल्पितस्य दयितस्य समीपं उपपति, ( सरेत् अभिसरेत् ) । ४ चक्रस्थाने 'चारु' इति स्याच्चेद् वरम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सिन्धोर्वेलाशिखरिषु तवाभ्यागमात्पुष्पितेषु
स्थित्वा रात्रावविरतरतश्रान्तविद्युद्वधूकः ।
किञ्चित्साचीकृतनिजतनुः[1] पश्चिमामाश्रयेथाः
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥६१॥
सौराष्ट्रीणां हृदि विरचयन् बिन्दुभिर्मौक्तिकालीं
पावित्र्यार्थं ननु निजतनोः सिद्धशैलं[2] भजेथाः ।
यः शृङ्गस्थोन्नतजिनगृहच्छत्रगौरांशुभासी
राशीभूतः प्रतिदिशमिव त्र्यम्बकस्याट्टहासः ॥ ६२ ॥
मन्ये नन्तुं वृषभभगवत्पादयुग्माम्बुजन्म
तत्रारूढे त्वयि शिखरिणः स्निग्धवेणीसवर्णे ।
भृङ्गव्याप्ताविव हि कुमुदस्तस्य[3] शोभा भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ६३ ॥
गन्धालीढैः कुसुमसलिलैः पूजनायां जिनेन्दो-
र्वृन्देऽलीनां स्फुरति परितो भाविनी काऽपि शोभा ।
भावार्हन्त्ये चिकुरनिचये वाञ्जनाभे सलील-
मंसन्यस्ते सति हलभृतो मेचके वाससीव । ६४ ।
( पाठान्तरम् )
संपूज्याऽऽरात्रिकरचनया विद्युतो मारुदेवं[4]
स्तोत्रैर्मन्द्रध्वनितजनितैश्चाभिनन्द्यात्मशुद्ध्यै ।

---

१ तिर्यक्कृतस्वशरीरः । २ सिद्धाचलं शत्रुञ्जयापरपर्यायं जैनमहातीर्थम् । ३ भृङ्गव्याप्तौ भ्रमरकृते आक्रमणे सति कुमुदः कुमुदस्येव तस्य सिद्धाचलस्येत्यर्थसंबन्धः । ४ मरुदेवाया अपत्यं ऋषभमित्यर्थः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अभ्रैः स्त्रीणां विषमसरणौ श्रोणिभारालसानां
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥ ६५ ॥
आस्थाय [1]श्रीवृषभविभुना सोयमष्टापदाभः
पूतस्तेनात्मनि जलभृते मानसत्वं विदध्याः ।
यास्तत्रार्हन्मह[1]नविधये स्वर्वशा[2]ः स्नान्ति नैव
क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भापयेस्ताः ॥ ६६ ॥
वर्षोत्कर्षैर्द्रुमसमुदये विद्रुमाभां वितन्वन्
मत्वा सिद्धस्थलमनुपदं नर्त्तयन् मोरसार्थान् ।
नित्यं शत्रुञ्जयम[3]नुनयन् वातलूनैः प्रसूनै-
र्नानाचेष्टैर्जलद ! ललितैर्निर्विशेस्तं नगेन्द्रम् ॥ ६७ ॥
उद्यातोऽस्माद्गुरुयुगपदन्यासमानम्य सम्यग्
वार्धावन्तःपुलिननिवसद्द्वीपपुर्यामवेयाः ।
प्रावृट्काले वहति निलयैर्या जलान्युद्गिरद् वो
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६८ ॥
श्रेणीभूतापणविलुलितव्यक्तमुक्ताम्बुधाराः
कान्ताकान्तिस्फुरिततडितस्तोरणेन्द्रायुधाढ्याः ।
नित्यं नृत्यप्रहतमुरजस्निग्धगम्भीरनादाः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ ६९ ॥
भुक्त्वा सौख्यं चतुरवनितागात्रधाराग्रहस्त-
स्पर्शैः पुष्पोपवनपवनाश्लिष्टरम्भाः प्रपश्यन् ।

१ पूजार्थम् । २ देवाङ्गनाः । ३ प्रसादयन् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रोधः सिन्धोरनुभव मुदा यत्र योधा रमन्ते
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥ ७० ॥
गर्जैरूर्जस्वलजलनिधेः क्षोभभावं प्रणेष्यन्
क्षेमावाप्तं त्रिदशनगरं त्वं विशेस्तातपूतम् ।
द्यावाभूम्योः प्रमुदचरितं वक्ति साक्षाद्द्रुमेषु
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ ७१ ॥

## अथ श्रीदेवकपत्तनवर्णनम्—

शास्तीत्येवं गुरुपरिचितं यत्पुरं दह्यमान-
धूपव्यक्त्या चिकुरवलयैर्नृत्यकृत्केतुहस्तैः ।
लक्ष्मीवासाम्बुजमहममी षट्पदास्ते न यद्वा
वित्तेशानां न खलु च वयो यौवनादन्यदस्ति ॥७२।
दण्डश्चैत्ये कुसुमनिचये बन्धनं विप्रयोगो[1]
दातुर्द्वारे चलकुटिलता सुभ्रुवोर्नान्यलोके ।
केशासक्त्या ( ? ) ह्यगुरुदहनोद्धूतधूमस्य मन्ये
वित्तेशानां न खलु च वयो यौवनादन्यदस्ति ।।७३॥
( पाठान्तरम् )
रात्रौ यस्यां कथमपि समानीय सञ्चारिकाभि-
र्वासावासं प्रणयिसविधे स्थापिता या नवोढा ।
तासां भोगादरिणि रमणे दीपमुद्दिश्य मुक्तो
ह्रीमूढानां भवति विफलप्रेरणश्चूर्णमुष्टिः ॥ ७४ ॥

---

१ वियोगो ब्राह्मणयोगश्च ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लक्ष्म्या[1]ः स्थानं तदिति मतिमान् वर्धयत्यूर्मिहस्तै-
मुक्तायुक्तैः पुरपरिसरे स्वाङ्कमासार्य सिन्धुः ।
तत्सुप्रापैः कनकसिकताराशिगुप्तैः सखीभिः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ ७५ ॥

कामादेशाद्गमनसमयेऽलक्तकव्यक्तपाद-
न्यासैर्वासैर्मसृणघुसृणालेपनैर्यत्र भित्तौ ।
मुक्तास्रग्भ्यो विलुलितकणैः कङ्कणैः शीर्णबन्धै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥ ७६ ॥

मुक्ताहारा इव वरभुवः सन्ति यस्यां विहारा[2]ः
शाटी पुर्याः कुवलयदृशः[3] श्रेयसी पुष्पवाटी ।
शालास्त्यागप्रकृतिकृतिभिर्निर्मिताः श्रीविशालाः
नित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥७७॥

यैरासङ्गादिव जलनिधेः प्रापि रत्नाकरत्वं
सार्धं नित्यं मुनिगुरुगुणोद्गातृभिस्तेऽर्थितीर्थम् ।
श्रान्तं तारान्वितमिव दिवः खण्डमुद्दण्डपुष्पं
बद्धापानं बहिरुपवनं कामिनो निर्विशन्ति ॥ ७८ ॥

राज्ञः सौधावलिषु तपनोत्सर्पणात्सूर्यकान्तै-
स्तप्तैरूष्मा य इह जनितो दुष्कलेस्तापरूपः ।
तं चैत्यस्थाः सपदि शरदश्चन्द्रपादानुवादा-
द्व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥७९॥

---

१ स्वकीयकन्याया इत्यर्थः । २ जिनमन्दिराणि । ३ कुवलयदृशः स्त्रीरूपायाः पुर्याः पुष्पवाटी एव शाटीति संबन्धः ॥



Jain Education International For Personal & Private Use Only www.jainelibrary.org

धन्यास्तेऽस्यां प्रतिदिनमहो श्रीगुरोर्वक्त्रपद्मात्
प्राप्तस्यन्दं प्रवचनरसं ये निपीयैव भव्याः ।
शृण्वन्त्युच्चैः पदरचनया गायनोद्गीतकीर्तिं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ८० ॥
पीनोत्तुङ्गस्तनपरिचयी [1]कञ्चुकः पुष्पजालैः
पत्रैश्चित्रैर्भवति रसना पल्लवैः शेखरश्रीः ।
आम्रो भृङ्गावलिवलयितोऽस्मिन् युगे सातिरेक-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥ ८१ ॥
वातोद्धान्तैः सलिलपृषतैः क्षोभयन्तो मृगाक्षी-
र्गातुं वृत्ता गुरुगुणपदं पुण्यलावण्यभाजः ।
साध्वीस्पर्शादिव कलुषितास्तोयदा यत्र जालै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ८२ ॥
कामोऽपि स्वं प्रगुणयति नो कार्मुकं पुष्परूपं
मौर्वीभङ्गादिव नववधूश्वासलोभादलीनाम् ।
यूनां चेतो व्यथननिपुणैः काक्षबाणैः सनाथै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ ८३ ॥
तस्यां वप्रः सुरगिरिगुरुः काञ्चनः काञ्चनाभां
तुङ्गैः शृङ्गैर्वहति तरणेरप्यनुल्लङ्घनीयः ।
यन्मूर्धस्थैः रसिकपुरुषैः स्पृश्यते स्वर्गतोऽपि
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ॥ ८४ ॥

---

१ पाठान्तरे "मञ्जरीहैमहारः" ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सिन्धोस्तत्रानुज इव लसद्वीचिवासास्तडाग
उद्यानान्तस्तरुणवयसो[1] दीर्घिकास्तस्य कान्ताः ।
तासां चञ्चन्नयननलिनैर्मोहिता मानसाम्भो
न ध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥८५॥

बद्धोत्साहा गमनगहने वातवद्वाजिराजी
राज्ञः स्वर्णाभरणसुभगः सामजानां[2] समूहः ।
यस्यां दानस्रवणानियतोद्स्तहस्तः प्रशस्तः
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ ८६ ॥

नव्यो भव्यैर्मरकतशिलानिर्मितोऽस्त्याश्रमोऽस्यां
गर्जद्वानानुगतमुरजः साधुनाथैः सनाथः ।
नित्यं व्याख्यापरिषदि वृतं तोरणैः काञ्चनीयैः
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥ ८७ ॥
( पाठान्तरम् )

## अथ श्रीगुरुवर्णनम्—

तत्रास्माकं विभुरभिनवैः पात्रवृन्दैः परीतः
स्फीतच्छायो वकुलकमलां संनिधत्ते प्रतीकैः[3] ।
किन्त्वक्षुब्धो मनसि भगवांश्चारुनार्या विलासैः
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥८८॥

नम्रानेकक्षितिपतिशिरोमौलिरत्नैर्नखानां
संयोगेन प्रभुचरणयोर्जायते सा विभूषा ।

---

१ तरुणानि वयांसि पक्षिणो यत्र ताः, अन्यत्र यौवनावस्थाशालिन्यः ।
२ हस्तिनाम् ३ अङ्गैः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्यक्तेर्बीजं नटनरुचितश्चन्द्रकाणां प्रचारै-
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ ८९ ॥
नित्याह्लादैः श्रमणमणिभिस्तत्र सेव्यांह्रिपद्म-
स्तेजोराशिः प्रसृमरयशा राजते सूरिसूर्यः ।
यद्दूरस्थो विदुर[1]मघवाऽप्याप्नुते[2] तां न शोभां
सूर्यापाये न खलु कमलं पुष्पति स्वामभिख्याम् ॥९०॥
गत्वा सूर्योदयनपुरतस्तत्र शोणाणुमूर्त्या
भक्तिं चन्द्रोदयरचनया व्यञ्जयन्नस्य सूरेः ।
दर्शं दर्शं वदनमलसां मोदपूर्णां पुनीथाः
खद्योताली विलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ ९१ ॥
यस्य ब्रह्मव्रतमविरतं बिभ्रतश्चित्तवृत्तिं
शच्यास्तस्या अपि मधुरता[3] नेतुमीशा न मोहम् ।
पीनोरोजा सरसिजमुखी क्षाममध्याऽऽयताक्षी
या तत्र स्याद्युवतिविषये सृष्टिराद्यैव धातुः ॥ ९२ ॥
प्राप्तक्षोभा विजयिनि गुरौ देवनाम्नीह पूर्वं
मोहादीनामसमपरिषच्छङ्कया शङ्कुकल्पा ।
साम्राज्येऽस्य प्रशमपवनैर्वेपमानां भयात्तां
जातां मन्ये तुहिन[4]मथितां पद्मिनीं वान्यरूपाम् ॥९३॥

---

१ पण्डितेन्द्रः मद्रूप इति भावः । २ 'आप्नुते' एतत्स्थाने 'अश्नुते' इति भवेत् । आप्नोतिर्हि आत्मनेपदी न वर्तते । ३ सौन्दर्यम् । ४ 'शिशिरमथितां' इत्यपि पाठः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वामिन्यस्मिन्नधिगतवति प्राज्यसाम्राज्यलक्ष्मीं
कीर्त्तिक्षीरैर्जगति बहुलैः प्लावितं पङ्कजालम् ।
तस्या लेपादिव खलमुखं श्यामिका व्याप्तिदम्भा-
दिन्दोर्दैन्यं त्वदनु सरणक्लिष्टकान्तोर्बिभर्ति ॥ ९४ ॥

अत्रान्तरे स्वामिचरितं किञ्चिदुच्यते—

जम्बूद्वीपे भरतवसुधामण्डनं कच्छदेशो
यत्राम्भोधिर्भुवमनुकलं पूजयत्येव रत्नैः ।
पृच्छन् पूता जननललनैः सूरिणा यैरमूनि
कच्चिद्भर्त्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥९५॥

चिन्तामण्याह्वयजिनयशो गातुकामेक्षुवाटे
शालेये वा जनयति भृशं गोपिका सिद्धमोहम् ।
वीणापाणिर्लयमुपगता तद्गुणैर्यत्र रागा-
न्भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ॥९६॥

आस्ते तस्मिन्नगरमुदितं श्रीमनोरम्यनाम
योगे दूरादुपगतवतां यत्र सांयात्रिकाणाम् ।
लोको रात्रिं नयति लववत्तद्वधूस्तत्र देशे
तामेवोष्णैर्विरहजनितैरश्रुभिर्यापयन्ती ॥ ९७ ॥

तत्र श्रेष्ठी शिवगुण इति प्रेयसी तस्य भाणी
तद्वेश्मोत्थैर्मणिभरकरैर्लोहिते व्योमभागे ।

---

१ हे रसिके ! भूः ! सूरिणा यैः जननललनैः त्वं पूता, भर्त्तुः अमूनि तानि जननललनानीत्यर्थः, त्वं कच्चित्स्मरसि ? हि यतः त्वं तस्य प्रिया इति पृच्छन् अम्भोधिः यत्र भुवं पूजयतीत्यर्थयोजना ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रातर्भ्रान्त्या गमयति तमीं[1] कोककान्ताशुभोगै-
स्तामेवोष्णैर्विरहजनितैरश्रुभिर्यापयन्ती ॥ ९८ ॥
सुप्तान्येद्युः कुसुमतलिने[2] श्रेष्ठिनः कामिनी सा
स्वप्ने सिंहं त्रिदशमहसापन्नसत्त्वा[3] ददर्श ।
हर्षोल्लासाद्विकचनयने किञ्चिदाकुञ्च्य निद्रा-
माकाङ्क्षन्ती नयनसलिलोत्पीडरुद्धावकाशाम् ॥९९॥
प्रासौत्[4] सूनुं जयमिव शची द्यौरिवेन्दुं समग्रं
भर्त्तुस्तस्मादतिशयिरसाद्वल्लभत्वं गता सा ।
गायत्युच्चैर्हसति रमते मोदते स्मालिवर्गैः
प्रायेणैतेऽरमणविरहेष्वङ्गनानां विनोदाः ॥ १०० ॥
स्फीतो बालः सुरतरुरिवानुक्रमाद्वैरिसिंहे-
त्याख्यां बिभ्रद्विजयपदतो[5] देवसूरेः कदाचित् ।
वाक्यैर्बुद्ध्वा प्रणयविवशां मातरं प्राह दान्त-
स्तामुन्निद्रामवनिशयनासन्नवातायनस्थः ॥ १०१ ॥
मातर्याचे विषयविरतस्त्वन्निदेशं व्रताय
मायाजालं विकृतिविरसं कस्य नोद्वेगहेतुः ।
स्त्री विक्षेप्तुं विरहविकृतां न प्रगल्भाऽपि शक्ता
गल्लाभोगात्[6] कठिनविषमामेकवेणीं करेण ॥ १०२ ॥

---

१ रात्रिम् । २ पुष्पशय्यायाम् । ३ गर्भिणी । ४ प्रासौत् असूत. 'षु प्रसवैश्वर्ययोः' इत्यस्य लङि रूपम् । ५ विजयदेवसूरेरित्यर्थः । ६ गल्लो नाम कण्ठप्रदेशः । 'गण्डाभोगात्' इति पाठान्तरम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रुत्वाऽकस्मादिति सुतवचो विद्युदापातकल्पं
मूर्च्छाऽतुच्छव्यथनकथनैः सङ्कुचद्विस्मिताक्षी ।
जाता माताऽवचनविषयाऽसह्यदुःखाभिघातात्
साभ्रेऽह्नीव स्थलकमलिनी न प्रबुद्धा न सुप्ता ॥१०३॥

मातुर्दुःखोदयमपदयं[1] भावयित्वा कुमारो
वीरेत्याख्यामिव नियमयन् भाविनीं वर्धमानः ।
पित्रोः सत्त्वे व्रतपरिचयो नेत्ययं निश्चिकाय
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥१०४॥

मातापित्रोर्दिवि परिगमे स स्वयं प्रात्तदीक्ष-
श्चक्रे वक्रेतरमतिधृतिः सूरिराजा स्वशिष्यः ।
तस्य ज्ञानं चरणमरुणप्रौढतेजः स्तुमः किं
प्रत्यक्षं ते निखिलमचिराद्भातरुक्तं मया यत् ॥१०५॥

पट्टे न्यस्तः स इह गुरुणा बन्दिरे गन्धपुर्यां
वैकाद्रीला १७१० शरदि समहं राधसम्यग्दशम्याम्[2] ।
लोकैस्तत्रानिमिषसमता......[3] नेत्रे यदेतन्-
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ १०६ ॥

मत्वा गच्छे वरसरसि नः सोऽयमुद्भूतपद्मेऽ[4]-
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ १०६ ॥
( पाठान्तरम् ).

---

१ निर्दयम् । २ वैशाखशुक्ल-। ३ अत्राक्षरद्वयं त्रुटितम् । तच्च ' प्रापि ' यद्वा ' नेषि ' इत्येतदग्रिमार्थ-संबन्धेन संघटेत । ४ पद्मा लक्ष्मीः, पद्मं कमलं च ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सोऽयं स्वामी विजयपदतः श्रीप्रभेत्याह्वयैव
लक्ष्म्या वाण्या जयति निलयो दर्शनादस्य पूर्वम् ।
वार्त्तां वक्तुं कृतनरतनोर्दक्षिणस्ते शुभाय
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ १०७
एतद्वृत्तं सुरशिखरिणस्तुङ्गशृङ्गेषु सिद्धै-
र्गीतं पीत्वा परमरसिका स्वजनानां वधूभ्यः ।
रम्भास्तम्भाऽऽलयमुपगता भर्तृयोगे भजन्ति
सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥१०८॥
तेजःपुञ्जैर्दिनकरकरस्पर्द्धिभिर्दुर्निरीक्ष्यं
शान्तस्वान्तं तपनरपतिं प्राप्य नम्रीकृताङ्गः ।
अत्रोद्भूतां सुकृतसरसां किंवदन्तीं विदग्धो
वक्तुं धीरस्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ १०९ ॥
प्रादूर्भूते दिनमुखसुखे सौरतेजस्त्रिधाऽपि
विश्वं व्याप्तं कथयति महीनाथ ! नान्दी विशेषः ।
कामक्रीडानिरतमिथुनान्युत्सृजंस्त्यक्तनिद्रं
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥११०॥
सभ्यास्थायामिह भगवतीपाठपूर्वोत्तराद्या-
ध्यायव्याख्या भवति तदनु श्रीगुरोर्गीतवृत्तैः ।
गन्धर्वाली सुखयति जनं सोत्सवं श्रोत्रपेयैः
कान्तोदन्तः सुहृदुपहृतः सङ्गमात्किञ्चिदूनः ॥१११॥
शिष्याध्यायोऽव्रतविरमणं तत्र बायूर्दिदेश
कीर्त्त्यङ्कुरानिव रजतजद्वादशोद्यद्दशाङ्कान् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वात्सल्यानि प्रवरवसनैर्नामजापोऽर्हदादेः
पूर्वाभाष्यं सुर(ल)भविपदां प्राणिनामेतदेव ॥ ११२ ॥
अर्हत्पूजाकुसुमरचनैर्नन्द्यमन्दोत्सवश्री-
दानं पात्रेष्वभयसहितं भावना भावनाढ्यम् ।
पर्वण्येवं नवनवभवैर्वार्षिके कल्पपाठः
पूर्वाभाष्यं सुर(ल)भविपदां प्राणिनामेतदेव ॥११३॥
( पाठान्तरम् )
कर्त्तुं कश्चित्स्पृहयति पुनस्तीर्थयात्रां ससङ्घं
कश्चिद्वोढुं व्रतविधिभरं वोपधानानि काचित् ।
इत्थं सङ्घो गुरुगुरुलसद्भक्तिरद्यापि धर्मे
सङ्कल्पैस्तैर्विशति विधिनाऽवैरिणाऽरुद्धमार्ग:[1] ॥११४॥
एवं नित्योत्सवपरिचयैराश्रितोऽपि प्रकामं
मेघः शिष्यो गुरुपदयुगासेवया विप्रयुक्तः ।
सर्वं बाह्यं मनसि रसिको मन्यमानः सुनेत-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ ११५ ॥
पूर्णाचन्द्रस्तव मुखविभां भावयत्येष पूर्णां
तेजस्वित्वं स्पृशति तरणिर्धीरतां मेरुरद्रिः ।
अम्भोवाहः प्रवहति तथाऽन्योपकारप्रकारं
हन्तैकस्थं क्वचिदपि न तेऽभीरुसादृश्यमस्ति ॥११६॥
तस्मादस्मादृशजनमनस्त्वन्निरीक्षामृतेन
दिष्ट्या पुष्टं क्वचिदपि रतिं नाप्नुते वस्तुगत्या ।

१ ( अनुकूलेन दैवेन ) प्रवृत्तावसर इत्यर्थः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नामालम्बात्सहमहमहो वासराणि व्रजन्ति
दिक्संसक्तप्रविरलघनव्यस्तसूर्यातपानि ॥ ११७ ॥
राकाचन्द्रेऽभ्युदयिनि भवद्वक्त्रमारोप्य बुध्या
ध्यानाधीनः क्षणमपि सुखं चेतसि स्थापयामि ।
अश्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥११८॥
वक्त्रार्थं ते समधित विधिः शारदेन्दोर्विभूषां
सारङ्गाक्ष्णोर्नयनविधये तद्द्वयोर्योग आसीत् ।
व्योमारण्ये तुहिनकपटादिन्दुकान्ताऽरुदत्तन्
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥११९॥
दासीभूतं प्रभुनवयशो ज्योतिषां पुण्डरीक-
खण्डं मन्ये सरसि हसितं निर्मिमीते समीरान् ।
आमोदाढ्यान् वरुणककुभः पूर्वभागेऽभ्युपेतान्
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ १२० ॥
जाने दिग्भिः पवनचमरैर्वीज्यसे त्वं तदेता-
श्चन्द्रो ज्योत्स्नामलयजरसैरर्चयन् पश्चिमायाम् ।
नत्वेवैवं वदति भगवद्वन्दने वृत्तिभाजो
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ १२१ ॥
पृथ्वीपाथःपवनतरवश्चन्द्रसूर्यादिदेवा-
स्त्वां सेवन्ते बहुरचनया दूरतोऽपि प्रशस्ताः ।
मत्सत्त्वं वा गगनशकलं दूयते केवलं यद्
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥१२२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चेतोवाक्ये मम निगदतोऽन्योन्यमाश्वासनाय
ध्यानाधीनैः स्तवनकथनैर्नीयतां दिष्टमेवम् ।
पश्चात्साक्षात्सुभग ! भगवत्सङ्गमे सर्ववृत्तं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ १२३ ॥
धन्यंमन्यस्तदुषसि विभो ! स्यामहं विश्वविश्वे
यस्यां रात्रौ लयनिलयगः संलये त्वां निषेवे ।
तां निद्रामप्यतिशयमुदा संस्तुवे ध्यानमुद्रां
दृष्टः स्वप्नेऽकितव ! रमयन् कामपि त्वं मयेति ॥१२४।
बालस्याऽनुक्षणकृतनतेर्मे स्वविज्ञप्तिरेषा
भाव्या स्वामिन् ! हृदयविषये संनिधेयो विधेयः ।
अर्याश्चर्यानुगतमनसो वर्त्तमाने यदर्था-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ १२५ ॥
विज्ञप्यैवं प्रवचननृपं श्रीविनीताभिधानो-
पाध्यायेन्द्रैर्विपुलमतिभिः सेवितं तन्निवृत्तः ।
तत्प्रत्युक्तानुनभन[1]मुखोदन्तवृन्दैर्ममापि
प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥१२६॥
एवं देव ! त्वयि विनिहितं कार्यमार्यं विचार्य
व्यक्तां शक्तिं सहृदयसुहृत् ! तावकीमत्र चार्थे ।
अङ्गीकारं द्रढयति तवाध्वानधाराप्रसारः
प्रत्युक्तं हि प्रणयिषु सतामीक्षितार्थक्रियैव ॥ १२७ ॥

---

१ अनुवन्दना ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूर्वं मोदात्तपनृपतिना मे स्वसेवाकुमारी
सौभाग्याढ्या प्रणयसरसोद्वाहिता तद्वियुक्तेः ।
तापं हृत्वा विचर जलदाभीष्टदेशान् यथेच्छं
मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥१२८॥
स्थित्वास्थायां मुनिपतिपुरोऽसौ निसृष्टार्थरूपी
दिव्यध्वानैर्जलधरवरो वाचिकं व्याचचक्षे ।
जातस्तस्मान्मुनिनरपतिः सप्रसादो विनेये
केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु ॥ १२९ ॥
प्रत्यागत्य प्रणयिहृदयाम्भोधरेणादरेणा-
दिष्टां वार्त्तां गुरुगुरुतरानुग्रहव्यञ्जिनीं सः ।
श्रुत्वा ज्ञानाचरणचरणोद्भूतभाग्यप्रतिष्ठान्
भोगानिष्टानविरतसुखं भोजयामास शश्वत् ॥ १३० ॥
माघकाव्यं देवगुरोर्मेघदूतं प्रभप्रभोः ।
समस्यार्थं समस्यार्थं[1] निर्ममे मेघपण्डितः ॥ १३१ ॥

॥ इति श्रीमेघदूतसमस्यालेखः संपूर्णः ॥

१ अर्थं समस्य संक्षिप्येति एतस्य पदस्यायमभिप्रेत्य यमकितं कविना ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org



Jain Education International For Personal & Private Use Only www.jainelibrary.org